# shrI subrahmaNyabhuja NgaprayAtastotraM 2

# શ્રીસુબ્રહ્મણ્યભુજઙ્ગપ્રયાતસ્તોત્રમ્ ૨

## Document Information

Text title : shrii subrahmaNyabhujaNgaprayaatastotraM 2

File name : subrabhujanga2.itx

Category : subrahmanya, bhujanga

Location : doc_subrahmanya

Transliterated by : Antaratma antaratma at Safe-mail.net

Proofread by : Antaratma, PSA Easwaran, Sreenivasa Rao Bhagavatula

Description-comments : From stotrArNavaH 07-04

Latest update : March 15, 2006, December 31, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# શ્રીસુબ્રહ્મણ્યભુજઙ્ગપ્રયાતસ્તોત્રમ્ ૨

ભજેઽહં કુમારં ભવાની કુમારં
   ગલોલ્લાસિહારં નમસ્કૃદ્વિહારમ્ ।
રિપુસ્તોમસારં નૃસિંહાવતારં
   સદાનિર્વિકારં ગુહં નિર્વિચારમ્ ॥ ૧॥

નમામીશપુત્રં જપાશોણ ગાત્રં
   સુરારાતિશત્રું રવીન્દ્વગ્નિનેત્રમ્ ।
મહાબર્હિપત્રં શિવાસ્યાબ્જમિત્રં
   પ્રભાસત્કળત્રં પુરાણં પવિત્રમ્ ॥ ૨॥

અનેકાર્કકોટિ પ્રભાવજ્વલન્તં
   મનોહારિ માણિક્ય ભૂષોજ્વલન્તમ્ ।
શ્રિતાનામભીષ્ટં સુશાન્તં નિતાન્તં
   ભજે ષણ્મુખંતં શરચ્ચન્દ્રકાન્તમ્ ॥ ૩॥

કૃપાવારિ કલ્લોલભાસ્વત્કટાક્ષં
   વિરાજન્ મનોહારિ શોણાંબુજાક્ષમ્ ।
પ્રયોગપ્રદાનપ્રવાહૈકદક્ષં
   ભજે કાન્તિકાન્તામ્બરસ્તોમરક્ષમ્ ॥ ૪॥

સુકસ્તૂરિકાબિન્દુભાસ્વલ્લલાટં
   દયાપૂર્ણચિત્તં મહાદેવપુત્રમ્ ।
રવીન્દૂલ્લસદ્રત્નરાજત્કિરીટં
   ભજે ક્રીડિતાકાશ ગઙ્ગાસુકૂટમ્ ॥ ૫॥

સુકુન્દપ્રસૂનાવલીશોભિતાન્તં
   શરત્પૂર્ણચન્દ્રસ્ય ષટ્કાન્તિકાન્તમ્ ।
શિરીષપ્રસૂનાભિરામં ભવન્તં
   ભજે દેવસેનાપતિં વલ્લભં તમ્ ॥ ૬॥

સુલાવણ્યસત્સૂર્યકોટિપ્રકાશં
   પ્રભું તારકારિં દ્વિષડ્બાહુમીશમ્ ।
નિજાર્કપ્રભાદીપ્યમાનાખિલાશં
   ભજે પાર્વતીપ્રાણપુત્રં સુકેશમ્ ॥ ૭॥

અજં સર્વલોકપ્રિયં લોકનાથં
   ગુહં શૂરપદ્માદિદંભોલિધારમ્ ।
સુબાહું સુનાસાપુટં સચ્ચરિત્રં
   ભજે કાર્તિકેયં સદા બાહુલેયમ્ ॥ ૮॥

શરારણ્યસંભૂતમિન્દ્રાદિવન્દ્યં
   દ્વિષડ્બાહુસંખ્યાયુધશ્રેણિરમ્યમ્ ।
મરુત્સારથિં કુક્કુટેશં સુકેતું
   ભજે યોગિહૃત્પદ્મમધ્યાધિવાસમ્ ॥ ૯॥

વિરિઞ્ચીન્દ્રવલ્લીશદેવેશમુખ્યં
   પ્રશસ્તામરસ્તોમસંસ્તૂયમાનમ્ ।
દિશ ત્વં દયાલો શ્રિયં નિશ્ચલાં મે
   વિના ત્વાં ગતિઃ કા પ્રભો મે પ્રસીદ ॥ ૧૦॥

પદાંભોજસેવા સમાયાતવૃન્દા
   રકશ્રેણિકોટીરભાસ્વલ્લલાટમ્ ।
કલત્રોલ્લસત્પાર્શ્વયુગ્મં વરેણ્યં
   ભજે દેવમાદ્યં ત્વહીનપ્રભાવમ્ ॥ ૧૧॥

ભવાંભોધિમધ્યે તરઙ્ગે પતન્તં
   પ્રભો માં સદા પૂર્ણદૃષ્ટ્યા સમીક્ષ્ય ।
ભવત્ભક્તિનાવોદ્ધર ત્વં દયાલો
   સુગત્યન્તરં નાસ્તિ દેવ પ્રસીદ ॥ ૧૨॥

ગલે રત્નભૂષં તનૌ મઞ્જુવેષં
   કરે જ્ઞાનશક્તિં દરસ્મેરમાસ્યે ।
કટિન્યસ્તપાણિં શિકિસ્થં કુમારં
   ભજેઽહં ગુહાદન્યદેવં ન મન્યે ॥ ૧૩॥

દયાહીનચિત્તં પરદ્રોહપાત્રં

સદા પાપશીલં ગુરોર્ભક્તિહીનમ્ ।
અનન્યાવલમ્બં ભવન્નેત્રપાત્રં
કૃપાશીલ માં ભો પવિત્રં કુરુ ત્વમ્ ॥ ૧૪॥

મહાસેન ગાઙ્ગેય વલ્લીસહાય
પ્રભો તારકારે ષડાસ્યામરેશ ।
સદા પાયસાન્નપ્રદાતર્ગુહેતિ
સ્મરિષ્યામિ ભક્ત્યા સદાહં વિભો ત્વામ્ ॥ ૧૫॥

પ્રતાપસ્ય બાહો નમદ્વીરબાહો
પ્રભો કાર્તિકેયેષ્ટકામપ્રદેતિ ।
યદા યે પઠન્તે ભવન્તં તદૈવ
પ્રસન્નસ્તુ તેષાં બહુશ્રીં દદાસિ ॥ ૧૬॥

અપારેઽતિદારિદ્ર્યપાથોધિમધ્યે
ભ્રમન્તં જનિગ્રાહપૂર્ણે નિતાન્તમ્ ।
મહાસેન મામુદ્ધર ત્વં કટાક્ષા-
વલોકેન કિઞ્ચિત્પ્રસીદ પ્રસીદ ॥ ૧૭॥

સ્થિરાં દેહિ ભક્તિં ભવત્પાદપદ્મે
શ્રિયં નિશ્ચલાં દેહિ મહ્યં કુમાર ।
ગુહં ચન્દ્રતારં સ્વવંશાભિવૃદ્ધિં
કુરુ ત્વં પ્રભો મે મનઃ કલ્પસાલ ॥ ૧૮॥

નમસ્તે નમસ્તે મહાશક્તિપાણે
નમ્સ્તે નમસ્તે લસદ્વજ્રપાણે ।
નમસ્તે નમસ્તે કટિન્યસ્તપાણે
નમસ્તે નમસ્તે સદાભીષ્ટપાણે ॥ ૧૯॥

નમસ્તે નમસ્તે મહાશક્તિધારિન્
નમસ્તે સુરાણાં મહાસૌખ્યદાયિન્ ।
નમસ્તે સદા કુક્કુટેશાખ્યક ત્વં
સમસ્તાપરાધં વિભો મે ક્ષમસ્વ ॥ ૨૦॥

ય એકો મુનીનાં હૃદબ્જાધિવાસઃ
શિવાઙ્ગં સમારુહ્ય સત્પીઠકલ્પમ્ ।
વિરિઞ્ચાય મન્ત્રોપદેશં ચકાર

પ્રમોદેન સોઽયં તનોતુ શ્રિયં મે ॥ ૨૧॥

યમાહુઃ પરં વેદ શૂરેષુ મુખ્યં
સદા યસ્ય શક્ત્યા જગત્ભીતભીતમ્ ।
યમાલોક્ય દેવાઃ સ્થિરં સ્વર્ગપાલાઃ
સદોઙ્કારરૂપં ચિદાનન્દમીડે ॥ ૨૨॥

ગુહસ્તોત્રમેતત્ કૃતાન્તારિસૂનોઃ
ભુજઙ્ગપ્રયાતેન પદ્યેન કાન્તમ્ ।
જના યે પઠન્તે સદા તે મહાન્તો
મનોવાઞ્છિતાન્ સર્વકામાન્ લભન્તે ॥ ૨૩॥

॥ ઇતિ શ્રીસુબ્રહ્મણ્યભુજઙ્ગપ્રયાતસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by antaratma at Safe-mail.net
Proofread by antaratma, PSA Easwaran, Sreenivasa Rao Bhagavatula

*shrI subrahmaNyabhuja NgaprayAtastotraM 2*
pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*